युग्मा द्विजातयः पूज्याः वस्त्रकाञ्चनरादिना ।
तिलार्थेन्तु यवैः कार्य्या नान्दीशब्दानुपूर्व्वकम् ।
मङ्गलानि च सर्व्वाणि वाचयेत् द्विजपुङ्गवान् ॥
एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धञ्च सर्व्वदा ।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवान् बुधः ॥
दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः ।
दानेन सर्व्वकामाप्तिरस्य संजायते यतः ॥”
इति मात्स्ये साधारणाभ्युदयकीर्त्तनो नाम १७ अध्यायः । विस्तारस्तु श्राद्धतत्त्वे श्राद्धविवेके च द्रष्टव्यः ॥

वृद्धोक्षः, पुं, (वृद्धश्चासौ उक्षा चेति । “अचतुरेत्यादि ।” ५ । ५ । ७७ । इत्यादिना अच् प्रत्ययः ।) वृद्धवृषः । तत्पर्य्यायः । जरद्गवः २ । इत्यमरः ॥ (यथा, कुमारसम्भवे । ५ । ७० ।
“विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥”)

वृद्ध्याजीवः, त्रि, (वृद्ध्या आजीवतीति । आ + जीव + अच् ।) वृद्ध्युपजीवी । तत्पर्य्यायः । वार्द्धुषिः २ वार्द्धुषिकः ३ कुसीदः ४ कुसीदिकः ५ । इति शब्दरत्नावली ॥ वाधुः ६ । इति जटाधरः ॥

वृध, उ ङ व ऌ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । क्त्वावेट् ।) उ, वर्द्धित्वा वृद्ध्वा । ङ, वर्द्धते जनः । व, वर्त्स्यति विवृत्सति । ऌ, अवृधत् । इति दुर्गादासः ॥

वृध, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, वर्द्धयति । इति दुर्गादासः ॥

वृधसानः, पुं, (वृध + “ऋञ्जिवृधीति ।” उणा० २ । ८७ । इत्यनेन असानच् । स च कित् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (वर्द्धनशीले, त्रि । यथा, ऋग्वेदे । २ । २ । ५ ।
“हरिशिप्रो वृधसानासु जर्भुरत् ॥”
“वृधसानासु प्रवर्द्धमानासु ।” इति तद्भाष्ये सायणः ॥ यथा च तत्रैव । ४ । ३ । ६ ।
“कद्धिष्ण्यासु वृधसानो
अग्ने कद्वाताय प्रतवसे शुभं ये ॥”
“वृधसानः घृताद्याहुतिभिर्वर्द्धमानस्त्वम् ।” इति तद्भाष्ये सायणः ॥)

वृधसानुः, पुं, (वृध + बाहुलकात् असानुच् । स च कित् ।) पुरुषः । पर्णम् । कृतिः । इत्युणादिकोषः ॥

वृध्यं, त्रि, (वृध + “ऋदुपधाच्चाकॢपिचृतेः ।” ३ । १ । ११० । इति क्यप् ।) वर्द्धनीयम् । वृधधातोः क्यप्प्रत्ययेन निष्पन्नमिदम् ॥

वृन्तं, क्ली, फलपुष्पपत्रादिर्येन धार्य्यते तत् । बोटा इति भाषा । तत्पर्य्यायः । प्रसवबन्धनम् २ । इत्यमरः ॥ (यथा, रघुवंशे । ५ । ६९ ।
“वृन्तश्लथं हरति पुष्पमनोकहानाम् ॥”)
घटीधारा । कुचाग्रम् । इति मेदिनी ॥

वृन्ताकः, पुं, वार्त्ताकी । इति शब्दरत्नावली ॥

वृन्ताकी, स्त्री, वार्त्ताकी । इति राजनिर्घण्टः ॥

वृन्तिता, स्त्री, कटुका । इति शब्दचन्द्रिका ॥

वृन्दं, क्ली, (वृञ् + “अन्दादयश्चेति ।” उणा० ४ । ९८ । इति दन् नुम गुणाभावश्च निपात्यते ।) समूहः । इत्यमरः ॥ (यथा, भागवते । ३ । २८ । ३० ।
“भ्रत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ॥”)

वृन्दः, पुं, दशार्व्वुदः । शतकोटिरिति यावत् । इति ज्योतिषम् ॥ अस्य नामान्तरं महार्व्वुदः ॥

वृन्दा, स्त्री, तुलसी । इति शब्दरत्नावली ॥ जलन्धरपत्नी । अस्या विवरणं तुलसीशब्दे द्रष्टव्यम् ॥ केदारराजकन्या । राधाषोड़शनामान्तर्गतनामविशेषः । एतद्विवरणं वृन्दावनशब्दे द्रष्टव्यम् ॥

वृन्दारः, त्रि, मनोज्ञम् । इति शब्दमाला ॥

वृन्दारकः, पुं, (वृन्दमस्यास्तीति । वृन्द + “शृङ्गवृन्दाभ्यामारकन् वक्तव्यः ।” ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आरकन् ।) देवता । इत्यमरः ॥ (यथा, भागवते । ६ । १० । ३० ।
“अपि वृन्दारका यूयं न जानीथ शरीरिणाम् ॥”)
यूथपाता । यथा,—
“वृन्दारकः सुरे श्रेष्ठे मनोज्ञे यूथपातरि ।”
इति भरतधृतवाड़िः ॥

वृन्दारकः, त्रि, (वृन्दार + स्वार्थे कन् ।) मनोज्ञः । (यथा, महाभारते । ११ । १६ । ५ ।
“युवा वृन्दारकः शूरोविकर्णः पुरुषर्षभः ॥”)
श्रेष्ठः । इति मेदिनी ॥ तस्मते पवर्गीयादिः ।
वृन्दारकौ रूपिमुख्यौ । इत्यमरः ॥

वृन्दावनं, क्ली, स्वनामख्याततीर्थम् । तन्नामकारणं यथा,—
श्रीनारायण उवाच ।
“पुरा केदारनृपतिः सप्तद्वीपपतिः स्वयम् ।
आसीत् सत्ययुगे ब्रह्मन् सत्यधर्म्मरतः सदा ॥
स रेमे सह नारीभिः पुत्त्रपौत्त्रगणैः सह ।
पुत्त्रानिव प्रजाः सर्व्वाः पालयामास धार्म्मिकः ॥
कृत्वा शतक्रतुं राजा लेभे त्विन्द्रत्वमीप्सितम् ।
कृत्वा नानाविधं पुण्यं फलकाङ्क्षी न च स्वयम् ।
नित्यं नैमित्तिकं सर्व्वं श्रीकृष्णप्रीतिपूर्व्वकम् ।
केदारतुल्यो राजेन्द्रो न भूतो भविता पुनः ॥
पुत्त्रेषु राज्यं संन्यस्य प्रिया त्रैलोक्यमोहिनी ।
जैगीषव्योपदेशेन जगाम तपसे वनम् ॥
हरेरैकान्तिको भक्तो ध्यायते सन्ततं हरिम् ।
शश्वत् सुदर्शनं चक्रमस्ति यत्सन्निधौ मुने ॥
चिरं तप्त्वा नृपश्रेष्ठो गोलोकञ्च जगाम सः ।
केदारनामतीर्थं तत्तन्नाम्ना च बभूव ह ॥
तत्राद्यापि मृतः प्राणी सद्यो मुक्तो भवेत् ध्रुवम् ।
कमलांशा तस्य कन्या नाम्ना वृन्दा तपस्विनी ॥
न वव्रे सा वरं कञ्चित् योगशास्त्रविशारदा ।
दत्तं दुर्व्वाससा तस्यै हरेर्मन्त्रं सुदुर्लभम् ॥
सा विरक्ता गृहं त्यक्त्वा जगाम तपसे वनम् ।
षष्टिं वर्षसहस्राणि तपस्तेपे सुनिर्ज्जने ॥
आविर्ब्बभूव श्रीकृष्णस्तत्पुरो भक्तवत्सलः ।
प्रसन्नवदनः श्रीमान् वरं वृणित्युवाच सः ॥
दृष्ट्वा सा राधिकाकान्तं शान्तं सुन्दरविग्रहम् ।
मूर्च्छां संप्राप सा सद्यः कामवाणप्रपीड़िता ॥
सा च शीघ्रं वरं वव्रे पतिस्त्वं मे भवेति च ।
ओमित्युक्त्वा च रहसि चिरं रेमे तया सह ॥
सा जगाम च गोलोकं कृष्णेन सह कौतुकात् ।
राधासमा सा सौभाग्यात् गोपीश्रेष्ठा बभूव सा ॥
वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ।
वृन्दा यत्र कृता क्रीड़ा तेन वा मुनिपुङ्गव ॥ * ॥
अथान्यचेतिहासञ्च शृणुष्व वत्स पुण्यदम् ।
येन वृन्दावनं नाम निबोध कथयामि ते ॥
कुशध्वजस्य कन्ये द्वे धर्म्मशास्त्रविशारदे ।
तुलसीवेदवत्यौ च विरक्ते भवकर्म्मणि ॥
तपस्तप्त्वा वेदवती प्राप नारायणं परम् ।
सीता जनककन्या या सर्व्वत्र परिकीर्त्तिता ॥
तुलसी च तपस्तप्त्वा वाञ्छां कृत्वा हरिं पतिम् ।
दैवाद्दुर्व्वाससः शापात् प्राप्य शङ्खासुरं पतिम् ॥
पश्चात् संप्राप कमलाकान्तं कान्तं मनोहरम् ।
तस्याश्च तपसः स्थानं उदितञ्च तपोधन ।
तेन वृन्दावनं नाम प्रवदन्ति मनीषिणः ॥ * ॥
अथवा ते प्रवक्ष्यामि परं हेत्वन्तरं शृणु ।
येन वृन्दावनं नाम पुण्यक्षेत्रञ्च भारते ॥
राधाषोड़शनाम्नाञ्च वृन्दा नाम श्रुतौ श्रुतम् ।
तस्याः क्रीड़ावनं रम्यं तेन वृन्दावनं स्मृतम् ॥
गोलोके प्रीतये तस्याः कृष्णेन निर्म्मितं पुरा ।
क्रीड़ार्थं भुवि तन्नाम्ना वनं वृन्दावनं स्मृतम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वृन्दावनप्रस्तावः १७ अध्यायः ॥ * ॥
अथ वृन्दावनवर्णनम् ।
ईश्वर उवाच ।
“गुह्याद्गुह्यतरं हृद्यं परमानन्दकारणम् ।
अत्यद्भुतं रहस्यानां रहस्यं परमं परम् ॥
दुर्लभानाञ्च परमं दुर्लभं मोहनं परम् ।
सर्व्वशक्तिमयं देवि सर्व्वस्थानेषु गोपितम् ॥
सात्वतां स्थानमूर्द्धन्यं विष्णोरत्यन्तवल्लभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥
पूर्णब्रह्मसुखैश्वर्य्यंनित्यमानन्दमव्ययम् ।
वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि ॥
गोलोकैश्वर्य्यं यत्किञ्चित् गोकुले तत्प्रकीर्त्तितम् ।
वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशयेत् ॥
यद्ब्रह्मपरमैश्वर्य्यं नित्यं वृन्दावनाश्रयम् ।
तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता ॥
यत् स्यान्माथुरकं धाम विष्णोरेकान्तवल्लभम् ।
स्वस्थानमधिकं नामधेयं माथुरमण्डलम् ॥
निगूढं परमं स्थानं पुर्य्यभ्यन्तरसंस्थितम् ।
सहस्रपत्रकमलाकारं माथुरमण्डलम् ॥
विष्णुचक्रपरिभ्रामद्धाम वैष्णवमद्भुतम् ।
कर्णिकापत्रविस्तारं रहस्यक्रमभीरितम् ॥
प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात् ।
भद्रश्रीलौहभाण्डीरमहातालखदीरकाः ॥
बहुलं कुमुदं काम्यं मधु वृन्दावनं तथा ।
द्वादशैता वने संख्याः कालिन्द्याः सप्त पश्चिमे ॥